# मनुसंहिता

( चिरप्रभया टीकया समुद्भासिता )

चिरप्रभा-टीकाकारः
काशीचन्द्रविद्यारत्नः

राष्ट्रियसंस्कृतसंस्थानम्
नवदेहली

# मनुसंहिता

( चिरप्रभया टीकया समुद्भासिता )


चिरप्रभा-टीकाकार:

**काशीचन्द्रविद्यारत्न:**



राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालय:

( भारतशासन-मानवसंसाधनविकास-मन्त्रालयाधीनम् )

नवदेहली

# भूमिका

चिरेण खलु चिरप्रभेयमचिरप्रभेवाशामण्डलमुद्योतयन्ती प्रकाशमागतेति समुल्लसति अपि नः सन्तोषभर एतस्याः किल रचयिता सुगृहीतनामधेयस्तत्रभवान् वङ्गीयब्राह्मण-पण्डितकुलवरेण्यः कीर्त्तिकिरणावलीविमण्डितवङ्क्षमामण्डलः काशीचन्द्रविद्यारत्न-महोदयः प्रागेव एतत्प्रकाशनाद् विसृज्य नः शोकमयेऽन्धे तमसि पुरन्दरपुरीं प्रति प्रस्थित इति नितरां दुःखिता वयम्।

चिरप्रभाया अस्या मुद्रणेन प्रकाशयित्रा तत्र भवतो विद्यारत्नमहोदयस्य कृतिना सुशीलेन तनूजेन कामप्यस्या भूमिकामारचयितुमभ्यर्थितैरस्माभिश्चिरमनुत्साहतः किं करणीयमिति निर्णेतुमशक्नुवद्भिरस्थीयत।

तथाहि चिरप्रभाया रचयिता परमश्रद्धेयो विद्यारत्नमहोदयः खलु वयसा पाण्डित्येन अन्यैश्च स्पृहणीयगुणगणैश्चिरमस्माकं पूज्यकोटिमधिरूढो बभूव इति तत्प्रणीताया अस्या-ष्टीकायास्तदीयस्वर्गलोकाधिरोहणादनन्तरं कथमस्माभिर्मुक्तलज्जैर्विधेयं समालोचनमिति चेतसो नः समाकुलीभावो नैसर्गिक इति नात्रास्ति बहु वक्तव्यम्।

धन्या खलु इयमस्माकं जन्मभूमिर्वङ्गवसुधा यत्र प्रतिदिनमपचीयमानगीर्व्वाण-वाणीप्रचारेऽस्मिन्ननेहसि लब्धपुण्यजन्मना तत्रभवता विद्यारत्नमहोदयेन निखिलस्मृतिशिरो-मणीभूताया मेधातिथिगोविन्दराजसर्व्वज्ञनारायण-रामचन्द्र-कुल्लू कभट्टप्रभृतिभिः प्राचीनैः आचार्य्यवर्य्यैर्विरचितैर्भाष्यादिव्याख्यानग्रन्थैः समलङ्कृताया अपि मानवधर्म्मसंहिताया असाधारणार्थगाम्भीर्य्यविलक्षणशब्दसौष्ठवादिविमण्डितेयं सुविस्तृता व्यरचि चिरप्रभाख्या अभिनवा मनोहारिणी च टीका इति पर्य्यालोचयतः कस्य वा सहृदयस्य चेतो न खलु निमज्जति परमानन्दमहोदधौ ?

सत्सु सर्व्वतः पण्डितकुलधुरीणैरादृतेषु मेधातिथिप्रभृतिभिर्मीमांसार्णवपारङ्गतै-राचार्य्यवर्य्यैर्विरचितेषु प्राचीनभाष्यादिव्याख्याग्रन्थेषु अभिनवाया अस्याश्चिरप्रभायाः प्रचारो न किमपि गणनीयं प्रयोजनं मानवसंहितातत्त्वानुसन्धानपरेषु विद्वत्सु जनयितुमलमिति नाशङ्कनीयं, यतः अस्याश्चिरप्रभायाः समनुशीलनं नैपुण्येनावधानेन च सम्पाद्यमानं मानव-धर्म्मसंहितातात्पर्य्यं विजिज्ञासमानानां विदुषां सहृदयानां बहुष्वेव दुर्बोधेषु भागेषु निराकरि-ष्यत्येव दुरपनेयसंशयजातं जनयिष्यति च तत्र भक्तः विद्यारत्नमहोदयस्यासाधारणपाण्डि-त्यकल्पनानैरपेक्ष्यादिपर्य्यालोचनसमुद्भूतं कमपि परं प्रमोदभरं इति तु नः सुदृढो विश्वासः।

# विषयानुक्रमणिका


| | |
|---|---|
| पुरोवाक् | *iii* |
| भूमिका | *v* |
| चिरप्रभाया मङ्गलाचरणम् | *ix* |
| प्रथमोऽध्याय: | १ |
| द्वितीयोऽध्याय: | ३० |
| तृतीयोऽध्याय: | ८० |
| चतुर्थोऽध्याय: | १४० |
| पञ्चमोऽध्याय: | १८७ |
| षष्ठोऽध्याय: | २२० |
| सप्तमोऽध्याय: | २३८ |
| अष्टमोऽध्याय: | २७७ |
| नवमोऽध्याय: | ३४९ |
| दशमोऽध्याय: | ४१० |
| एकादशोऽध्याय: | ४३६ |
| द्वादशोऽध्याय: | ४९१ |

**चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।**
**तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः॥ ६९॥**

**इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।**
**एकापायेन वर्त्तन्ते सहस्राणि शतानि च॥ ७०॥**

**यदेतत् परिसङ्ख्यातमादावेव चतुर्युगं।**
**एतद्द्वादशसाहस्रं देवानां युगमुच्यते॥ ७१॥**

**दैविकानां युगानान्तु सहस्रं परिसङ्ख्या।**
**ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥ ७२॥**

---

तदेवाह चत्वारीति मनुष्याणां वर्षं ब्राह्ममहोरात्रं तत्परिमाणेनैव वर्षाणां चतुःसहस्राणि कृतयुगपरिमाणं महर्षयः प्राहुः तस्य युगस्य तावच्छती वर्षाणां चत्वारिंशतानि सन्ध्या, तावतां शतानां समाहार इति द्विगुसमासात् स्त्रियामापोऽपवादेऽप्प्रत्ययेन तावच्छतीति सिद्धं, सन्ध्यांशश्च तथाविधश्चतुःशतवर्षपरिमितः तयोर्युगपूर्व्वानन्तरकालवर्त्तित्वमाह विष्णुपुराणम्, तत् प्रमाणैः शतैः सन्ध्या पूर्व्वातत्राभिधीयते सन्ध्यांशकश्चतत्तुल्यो युगस्यानन्तरो हि यः सन्ध्यासन्ध्यांशयोरन्तर्यः कालोमुनिसत्तम युगाख्यः विज्ञेयः कृतत्रेतादि संज्ञक इति॥ ६९॥

इतरेष्विति, ससन्ध्यासन्ध्यांशेषु त्रेतादिषु सत्यादितरेषु दिव्यपरिमाणेन चतुःसहस्रवर्षाणामेकैकस्यापायेनहान्यायानि सहस्राणि वर्त्तन्ते अवशिष्यन्ते तावत्कालपरिमाणं युगानां यानि शतानि वर्षाणि अवशिष्यन्ते सन्ध्यासन्ध्यांशयोरपि तदेवपरिमाणं तथा च त्रीणि सहस्राणि त्रेतायाः, द्वापरस्य द्वे, कलेः सहस्रमात्रं, सन्ध्यासन्ध्यांशयोरपि त्रीणि शतानि त्रेतायां, द्वे शते द्वापरे, कलौ शतम्॥ ७०॥

यदेतदिति, आदौ पूर्व्वश्लोके चत्वार्य्याहुः सहस्राणीत्यादिना चतुर्युगं सङ्ख्यातं कालपरिमाणेन गणितं एतेषां युगानां द्वादश सहस्रं यत्र तदेवदेवानां युगं साहस्रमित्यण् स्वार्थे तथाच मानुष कृतयुगद्वादश सहस्रं देवानां कृतयुगं मानुष त्रेतायुगद्वादशसहस्रं देवानां त्रेतायुगं, द्वापरस्य कलेरप्येवं। मानुषचतुर्युगमेव देवानामेकं युगमिति न शक्यते व्याख्यातुं द्वादशसहस्रमित्यस्यानन्वयापत्तेः चतुर्युगद्वादशसहस्रं देवानामेकं युगमित्यपि निर्युक्तिकं सर्व्वेषां परिमाणसाम्यापत्ते एकापायेनेत्युक्तरीत्या वैषम्यं सम्पाद्यते चेत्तथैवास्तुनात्र विवदामहे॥ ७१॥

दैविकमिति, दैवपरिमाणेन युगसहस्रं ब्राह्ममेकमहर्ज्ञेयं रात्रिरपि तावती दैवयुगसहस्रमितैव, परिसङ्ख्यया इति वृत्त्यर्थमनुवादः॥ ७२॥